Ex/Sans/PG/4.1B/95/2019

# MASTER OF ARTS EXAMINATION, 2019

(2nd Year, 2nd Semester)

## SANSKRIT

## Course : XVI / B

## [Vedic Text and Pāṇinīya Śikṣā]

Full Marks : 30 Time : Two Hours

*The figures in the margin indicate full marks.*

१। अधोनिर्दिष्टेषु प्रश्न**द्वयम्** संस्कृतभाषया देवनागरीलिपिमाश्रित्य समाधेयम्। 6×2=12

(क) शिवसङ्कल्पसूक्तस्य ऋषिः कः? सूक्तमिदमवलम्ब्य मनसः स्वरूपं संक्षेपेण आलोच्यताम्।

(ख) कालसूक्तस्य कस्मिन् वेदे अन्तर्भावः? सूक्तमिदमुपजीव्य कालमाहात्म्यं समासतः समुपवर्ण्यताम्।

(ग) ऋग्वेदीये पुरुषसूक्ते उपलब्धं दार्शनिकं तत्त्वमुपस्थाप्य प्राच्यप्रतीच्यमनीषिभिर्विश्लेषितं मतं समुपस्थाप्यताम्।

२। अधोलिखितेषु एकस्य मन्त्रस्य सप्रसङ्गं व्याख्या संस्कृतभाषया देवनागरीलिप्या च कार्या। 6×1=6

(क) प्र सु वं आपो महिमानमुत्तमं कारुर्वोचाति सदने विवस्वतः।
प्र सप्तसप्त त्रेधा हि चक्रमुः प्र सृत्वरीणामति सिन्धुरोजसा।।

(ख) न मृत्युरासीदमृतं न तर्हि न राञ्या अह्न आसीत्प्रकेतः।
आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किं चनास।।

[*Turn over*]

(ग) यस्याश्चतस्रः प्रदिशः पृथिव्या यस्यामन्नं कृष्टयः संबभूवुः।

या विभर्ति बहुधा प्राणदेजत्सा नो भूमिर्गोष्वप्यन्ने दधातु।।

३। वेदाङ्गतायाः शिक्षायाः किं स्वरूपम्? प्रातिशाख्यं नाम किम्? शिक्षाप्रातिशाख्ययोः किं पौर्वापर्यम्? 6×1=6

**अथवा**

पाणिनीयशिक्षामाधारीकृत्य वर्णोच्चारणस्थानानि निरूप्यन्ताम्।

४। अधोनिर्दिष्टेषु अन्यतरस्य व्याख्या संस्कृतभाषया देवनागरीलिप्या च करणीया। 6×1=6

(क) आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया।

मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्।।

(ख) माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः।

धैर्यं लयसमर्थं च षडेते पाठका गुणाः।।

---